स्यचंद्रमसः कमलिन्याश्च चिंतासुस्मरणेष्वपि ताभ्यां तिलानं भवति। इदं महदाश्चर्यं कीदृशायाः अस्याः कंद
र्पज्वरेण कामतापेन यः संज्वरः पीडा तेन आकुलं चंचलं। तनुः शरीरं यस्याः किंतु रहसि स्थिता सोराधा त्व

कंदर्पज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमाकमलिनीचिंतासुताभ्यस्तपि।
किंतु क्षांतिवशेन नीतिलतनुं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमसौ क्षीणा क्षणात्प्राणिति॥२॥

मेवमेकं असाधारणं प्रियं वल्लभं ध्यायति। क्षणं मुहूर्तं सति वशेन क्षांत्या यत्तं भावलक्षणं तिवशेनेति पाठे भवत
यातस्मिन क्षणे नागतः क्षणात् रणागतमिष्यतीति। अनुरागेण कथं प्राणिति जीवतीति कथमिति भ्रमे कीदृ
शीराधा क्षीणा कृशांगी॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया तो। श्वसितिकथमसौ रसालशाखां निरविरहेण विलोक्य पुष्पितां ॥४॥

गोनकथं श्वसिति। नज्ञायते। किंकृत्वा पुष्पितां आंरसालशाखां आम्रशाखां विलोक्य ॥४॥

दर्शनीकथोपक्रमं तत्कालकविभीकान्तप्रसादविषयं प्रकटो दृष्टा। गोपतनोः गोपशरीरस्य कंसद्विषः श्रीकृष्णस्य बाहुः हस्तः भवतां युष्माकं भक्तानां मित्यर्थः श्रेयांसि कल्याणानि तनोतु विस्तारयतु। कीदृशो बाहुः दृष्टाजलदृष्टया कुलांस्तावनवशात्वरक्षणवशात् गोवर्धनाख्यगिरिं धृत्वा सप्ताहं बिभ्रत् धारयत्।

दृष्ट्याकुलगोकुलावनवशादुत्पृत्य गोवर्धनं बिभ्रद्भुजसुंदरीभिरधिकानंदाद्विसंस्तुवितः। कंदर्पेणतदर्पिताधरतटीसिंदूरमुद्राकृतो बाहुर्गोपतनोस्तनोतुभवतां श्रेयांसि कंसद्विषः ॥५॥ इति श्रीगीतगो विंदे महाकाव्ये जयदेवकृतौ स्निग्धमाधवो नाम चतुर्थः सर्गः ॥४॥

पुनः कीदृशो बाहुः भुजसुंदरीभिः गोपीभिः अधिकानंदाद् तिहर्षेण विलः पुनः कीदृशः कंदर्पेण कामपरवशतया ताभिः गोपीभिः अर्पिता स्तापिता दत्ताः अधरतट्यएव सिंदूरमुद्राः सिंदूरचिह्नानि लिप्तत्वात् कृतः चि

ताभि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

दूरीकृतस्त्वप्रेरितासखीआहाअहमिति। इतिमधुरिपुणाकृष्णेनेनियुक्ता।प्रेरितासखीस्वयमेवगा
त्यरदंवक्ष्यमाणंराधांपुनर्जगादउवाच। इतीतिकिंहेसखिअहंहहनिकुंजेनिवसामि।स्थितोस्मिलंरा

अहमिहनिवसामियाहिराधामनुनयमद्वचनेनचानयेथाइतिमधुरिपुणासखीनियु
क्तास्वयमिदमेत्यपुनर्जगादराधांशब्दशीवराळीरागिण्यरूपकतालेनगीयते।

धांप्रतियाहिअनुनयवृत्तांनयाममवचनेनममसंतनेनवचसाआनयेथाःआनयस्वेतिमहतीतिअ
स्यगीतस्यवराळीरागिणीतलूक्षणंविनोदयंतीदयितंसुकेशीसुकंकणाचारणेनचापलेनाकर्णेदधाना

मेर

अत्राभिसारिकालक्षिकावर्णनीयाततदुक्तंरसिकसर्वस्वेसंस्कृतातप्राकृतांमिश्रंततोपभ्रंशभाषणं
ततःप्रियतरोवेश्यासर्वतश्चाभिसारिकाततत्रेवलक्षणं।उज्ज्वलाहित्वासमाकृष्यायोवनेनमदेनवाअ
भिसरतिपाकांतंकीर्तितासाभिसारिकेतिहेसखिहराधेतवविरहेवियोगेवनमालीकृष्णःसीदतिदुःखि

वहतिमलयसमीरेमदनमुपनिधायास्फुटतिकुसुमनिकरेविरहिहृदयदलनायाः॥
तवविरहेवनमालीसखिसीदतिराधेमाधः॥

तोभरतिकस्मिन्सतिमदनंकाममुपनिधायसाहायंकृत्वामलयसमीरेदक्षिणपवनेवहतिसति।पुनःक
स्मिन्सतिविरहिणांवियोगिनांहृदयदलनायहृदयस्फोटनायकुसुमनिकरेपुष्पसमूहेस्फुटतिविकसति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं कृष्णेन रिता सखी आह। अहमिति। इति मधुरिपुणा कृष्णेन नियुक्ता। प्रेरिता सखी स्वयमेवा
त्यरदं वक्ष्यमाणं राधां पुनर्जगाद कृष्णे। इतीति किं। हे सखि अहं इह निकुंजे निवसामि। स्थितोऽस्मि। तर

अहमिह निवसामि या हि राधा मनुनयमदुक्तेन नयेथा। इति मधुरिपुणा सखीनियु
क्तास्वयमिदमेत्य पुनर्जगाद राधां। शरदिंदीवरा कीरगौर्यरूपकताले गीयते।

राधां प्रति या हि। अनुनयवचनेन। मम वचनेन। मम सांत्वनेन। नय। वसा। आनयेथाः। आनयस्वेति। अहतीति
स्वगीतस्य वराळीरागे परीतलुक्षणं विनोदयंतीदयितं सुकेशी सुकंकणा चारुणं चापलेनाकर्णदधाना

अत्राभिसारिकानायिकावर्णनीया। तदुक्तं रसिकसर्वस्वे। संस्कृतात्प्राकृतं मिश्रं ततो पभ्रंशभाषणं
ततः प्रियतरावेश्या सर्वतश्चाभिसारिका। तत्रैवं लक्षणं। उज्झा हित्वा समाकृष्टा योवनेन मदेन वा। अ
भिसरति या कांतं कीर्तिता सा भिसारिके। हे सखि हे राधे तव विरहे वियोगे वनमाली कृष्णः सीदति दुःखि

वहति मलयसमीरे मदनमुपनिधाय। स्फुटति कुसुमनिकरे विरहिहृदयदलनाय। ॥१॥
तव विरहे वनमाली सखि सीदति राधे। ध्रु॰॥

तो भवति। कस्मिन्सति। मदनं काममुपनिधाय सहायं कृत्वा। मलयसमीरे दक्षिणपवने वहति सति। पुनः
स्मिन्सति। विरहिणां वियोगिनां हृदयदलनाय हृदयस्फोटनाय। कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दहतीति। हे राधे त्वं श्रीकृष्णः। शिरः मयूरेचंद्रमयूरेवदहति सति। मरणं मनुकरोति। मदनविरहे कामबाणे पतति सति विलपति। अतिशयेन विलापं करोति। कीदृशः कृष्णः विकलतरः विह्वलः। अधन्ती। मधुपसमूहे धनति। दृष्टे कुबाणे सति। श्रवणं कर्णं अपि दधाति। अंगुल्यग्रे णाच्छादयति। मनसि

दहति शिरः मयूरे मरणमनुकरोति। पतति मदनविरहे विलपति विकलतरो। ति॥२॥
धनति मधुपसमूहे श्रवणमपि दधाति। मनसि च लिति विरहे निवि निशि रुजमुपयाति॥३॥
स वहति विपिनवितानेत्यजति ललितधाम। लुठति धरणिशयने बहु विलपति तव नाम॥४॥

चलति विरहे सति निवि निशि। प्रतिरात्रि रुजं पीडां उपयाति। अनुभवति। स सतीति। सः विपिनवितानेऽरण्यविस्तारे वसतीति शेषः। परं ललितं धाम सुंदरं गृहं त्यजति। धरणिशयने पृथ्वीशयने। विलपति तव नामैव

लुठति

भणतीति। कविजयदेवे विरहिणां वियोगिनां। विलसितेन विलासेन भणति सति। वियोगिनि क्षितं कथयतीत्यर्थः। हरिः कृष्णः मनसि जयदेवसुकृतेन पूर्वोपार्जितपुण्योपचेन हेतुना उदयतु उदयं प्राप्नोतु। कीदृशे मनसि। भक्तस्य हर्षस्य विभवः आधिक्यं यस्मिन्॥४॥ ॥४॥ किंच तत्रास्यर्थतपः करोतीत्याह। पूर्वमिति। हे

भणति कविजयदेवे विरहिविलसितेन। मनसि भवतु हरिरुदयतु सुकृतेन॥१०॥
पूर्वं यत्र समस्तयातिपतिरासादितः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः ध्यायंस्तामनिशं जपन्निवतपवालापमंत्रावलीं भूयस्तत्कुचकुंभलिभरपरीरंभामृतं वाञ्छति॥

राधेमाधवः तस्मिन्नेव कुंजमन्मथमहातीर्थे तत्र। पुनस्तां अनिशं ध्यायन्। तेवालापमंत्रावलीं मंत्राक्षरसमूहं जपन्नेव मयः पुनरपि तत्कुचकुंभयोरंभस्तत्तदोयस्तनकलशाग्रदलिंगनपीयूषमिव अमृतमिव वाञ्छति। कुंजमन्मथमहातीर्थे तत्र यासमरतिपतिः कामस्य सिद्धयः मनोरथाः आसादिताः प्राप्ताः तस्मिन्नेव तत्रैव मोक्षाण

× वातपस्ता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रराजीसखीराधांप्रतिगंतुंप्रेरयतिगीतेनारतीति।हेनितंबिनिमहानितंबयुक्तेराधेयमुनातीरेयद्वनंतस्मिन्वन
माळीकुञ्जेवसतिति।शीतेशीटेतीरेधीरसमीरेमंदसमीरेमारुतेहेसखिगमनविलंबनंअभिसारगमनविलंब

पद्यं

गुर्जीरगीतैकताळीताळैः।रतिसुखसारेगतमभिसारेमदनमनोहरवेशं।नकुरुनितंबिनिगमन
विलंबनमनुसरतंहृदयेशं।धीरसमीरेयमुनातीरेवसतिवनेवनमालीगोपीपीनपयोधरम
र्दनचंचलकरयुगशाली॥१॥

नंनकुरुमाकुरुतांहृदयेशंकृष्णंप्रतिअनुसरअनुगच्छशीटेतांहृदयेशं रतिसुखसारे रतिसुखमेवसारोयु
ख्यंयस्मिन्एतादृशेअभिसारेसंकेतस्थानेगंतुं स्थितांपुनःशीटेशंमदनवत्मनोहरःवेषःशरीराकारोयस्य॥

॥२७॥

१ मदुदारमुर्मर्दयेंगु×

ह

नामेतिहेराधेसकलःनामर्मतवनाम्नासमेतंयुक्तंमृदुवेणुंकृतसंकेतंयथास्यात्तथाअहमिवअभिसारेति
छामिःस्वमंत्रेवागच्छति।कृतःसंकेतोयस्यांकियायांवाहृयतेतावतानुसंगतमेवंपवनचलितःशरीरसंबंधिवस्त्रं
नात्रेतिंतत्रपिअणुंअपिरेणुंधूलिमपिबहुसाधुमनुतोनापतीति।सकलःशयनशय्यारचयतिनिमीलितः

नामसमेतंकृतसंकेतंवादयतेमृदुवेणुं।बहुमनुतेतनुतेतनुसंगतपवनचलितमपिरेणुं॥२॥
पततिपतत्रेविचलतिपत्रंशंकितभवदुपयानंरचयतिशयनंसचकितनयनंपश्यतितवपंथानं॥३॥

वपंथानंमार्गंसचकितनयनंयथास्यात्तथापश्यतिशीटेशंमार्गंपतितेपक्षिणिगच्छतिसतिपत्रे विचलतिकंप
मानेसतिशंकितंसंभावितंभवत्याःउपयानंयस्मिन्एतादृशंयःसमागच्छतीतिपतत्रंपक्षिणंपत्रंतेतत्रविशतियस्मि

पक्षः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰गो॰टी॰ ॥३८॥

सुखरमिति। हे सखि राधे सुखरं शब्दयुक्तं मंजीरं अंजीरं शब्दादिकं रोलगमनसूचकमित्यर्थः। कैलो॰ कीडायां सुखे
ल अति च चलं अतश्चरि पुमिवच्चञ्चलमिवच्चञ्चुरपि अतिमुखरो॰ मंजीरं च चलश्च भवति। मंजीरं त्वकांतिमिर पुंजं
अंधकारसमूहसहितं कुंजलता गृहशाखा नीलं निचोलं श्यामवस्त्रं शीलयति धरति। हे शोभनउरसीति। हे शोभनगो
रांगि। हे सुकृतो विपाके दूरं कुंजं भाजितं सुकृतस्य विपाकः फलं तस्य तातं संबोधनं। अन्यथा कृत्रिम विपरीत सुरते

सुखरमधीरं त्वजमंजीरं रि पुमिवकलिसुखेलं॰ चलसखि कुंजं सतिमिरपुंजं शीलयनीलनिचोलं॥
उरसिमुरारेरुपहितहारे घनइव तरलबलाके तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥॥

कश्चिद्ग्रन्थे तरलखेटसिपक्षसितं रतिविपरीते। पुरुषायितनायिकारतिकालेतडिद्विराजसि शो॰ मित्यस्ते वर्तमान
सामीप्यरतिलक्षणे। कीटरोउरसि उपहितआरोपितो। हारो यस्मिन्। पुनः कीटरो घनइव मेघसदृशो। कीटरोमेघतर
लबलाके मेघबलाकसदृशे। हारस्य बलाकसाम्यं उरसोमेघसाम्यं राधायास्तडित्साम्यं॥॥

॥३८॥

विगलितेति। हे राधे त्वं किं सलयशयने न पल्लवरायायां। पंकजनयने पुंडरीकाक्षे। कुचे कटि
पूर्वभागे घटयसंगमयेति। विपरीतसुरतं सूचितं। कीटराज घनं विगलितवसनं लक्ष्मवस्त्रं। पुनः
परिहृतरसनं। परिहृतारसना क्षुद्रघंटिका यत्र। अतएव अपि धानं आवरणरहितं आनेर स्तन

विगलितवसनं परिहृतरसनं घटयजघनमपि धानं। किं सलयशयने पंकजनयने निधि
मिव हृषीकेशे धानं॥ हरिरभिमानीरजनिरिदानीमियमपि याति विरामं कुरु ममवचनं सत्व
रं रत्नं पूरय मधुरिपुकामं॥॥

निधिमिवनिधिसदृशं क्षुत्पिपासाहृतमुखो हर्षाय भवति निधिः॥ हरि
रिति। हरिरपि अभिमानी नीलपूर्वनसहतीत्यर्थः। इदानीं अधुना रजनिरपि विरामं अवसानं याति। वर्तमा
नेलट्। मम वचनं कुरु। पीत्रिति यर्थः। कीटरो वचनं सतरा॰ गी॰ प्रास्वनाय स्निग्धगलाचमधुरिपुकामं॥

॥१७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवेति। कृतहरिसेवेकृताहरिसेवाकृष्णचिंतनादियेनतस्मिन्जयदेवेपरमरमणीयं अतिशयेनमनोहरं इदंगीतंभणतिसतिकथयतिसति। प्रमुदितहृदयेसतुष्टचित्तेह

श्रीजयदेवकृतहरिसेवेभणतिपरमरमणीयं॥
प्रमुदितहृदयेहरिमतिसद्यनमतसुकृतकमनीयं॥ ११॥

रिनिमतधनमस्कुरुतेभक्तान्प्रतयुक्तिः। कीदृशंअतिसद्यंअतिरम्यंयुक्तं। प्रसन्नहृदयेहरिं ॥२४॥
करोतिशीघ्रंप्रसीदतिनमनंकर्तव्यमितिभावः। पुनःसुकृतकमनीयंपुण्यनाऽऽमीयमानं।

इति

अधुनाराधांगंतुंप्रेरयतिविकिरतीति। हेकांतेतवप्रियःकृष्णःमदनकदनक्लांतःकामपीडेमतदोव
तेतिस्वतिकेनप्रकारेणत्वतआहाविकिरतीत्यादिरदनोमपिनागतेत्वत्कृतेतिस्वासान्जुहुर्मुहु
र्वारंवारंविकिरतिविक्षिपतिएकाग्रचित्तेनतामेवध्यातुंनासापुरोनासाग्रंमुहुरीक्षतेपश्यति। अ

विकिरतिमुहुःश्वासान्नासापुरोमुहुरीक्षतेप्रविशतिमुहुःकुंजंपुंजन्मुहुर्वेकुंठाम्यतिरश्च
यतिमुहुःशय्यापर्यंकुलंमुहुरीक्षतेमदनकदनक्लांतःकांतेप्रियस्तवतर्तेतो॥१२॥

नःदृष्टमुहुःकुंजंठतागृहंप्रविशतिअत्रभविष्यतीति। नाप्यदृष्टमुहुःकुंजंरहःपथेकासीदितस
दिजल्पकरंताम्यतिहःखितोभवतिवामागतादृष्टेवमुहुःशय्यांरचयतीशय्यांकृत्वातां
मनागतांविशतिमुहुःपर्यंकुलंरक्षतेस्वान्पश्यतीरश्नोमेमदृष्टापुनःकुत्रगतेति॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

स्थे

तद्दाक्षेनेति हे मुग्धे सूढेत्तद्दाक्षेन अस्तं यमानसहितेन सह समग्रं साम्प्रतं न अधुना इदानीं गोविंदस्य
शुः सूर्यास्तगतः अस्तं यमानसहितः सूर्यो लग्नगतः अभिसरणकालो भवति सूर्यः गोविंदस्य कु
लस्य मनोरथेन इदानीं राधा भागमिष्यतीति राहुच्छायासमसहतमः अंधकारः सांद्रतां निबिडतां प्रा

तद्दाक्षेन समं समग्रमधुनाति भांशुरस्तं गतो गोविंदस्य मनोरथेन च समं प्राप्ततमः सांद्रतां क्रो
काना करुणस्वनेन सरश्रीदीर्घामद्भ्यर्थनात सुखविफलं विलंबनमसारस्याभिसारः क्षणः ॥७॥

तं शीर्षामद्भ्यर्थना श्रीघ्रंगम्यतामिति मदीयाप्रार्थना क्रोकानां चक्रवाकानां करुणस्वनेन विरहदुःख
राहेन सरश्रीयथा क्रोकानां करुणस्वरानानाप्रकारः श्रूयेत तथा मदीयाः काकुक्तयः संप्रतिनवाग्रे भव
तीत्यर्थः तस्माद्दता विलंबनं विफलं असो अभिसारक्षणो अभिसरकालो योग्यगमनयोग्यदेश्यर्थः ॥७॥

ण रस्यो

मिथो

१ रसा

पुनः कीदृशयोः श्रमान्मांशयाणाढ्यकोर
सानुमिलितयोः

अभिसारे अधिकं भवतीत्याह आश्लेषादिति दंपत्योर्जायापत्योरस्तमसि अंधकारे द्वाविमिश्रोल
ग्नायुक्तः रसः भवत्यभिप्रेतसंश्लेषस्मृतिरादिरसो भवत्येव। कीदृशयोर्दंपत्योः अन्योन्यं परः
स्त्रीपुरुषार्थगतयोः संकेतस्थानं प्राप्तयोः अनंतरं आश्लेषादिविशेषणानि याज्ञा। तत्रैवं संभोग क्र
मः प्रथमं मालिंगनं ततश्चुंबनं ततो नखक्षतं ततः कामो द्वौ धावतः ततः सम्भ्रमः ततो मैथुनः ततः प्रीतिः तत

आश्लेषादनुचुंबनादनुनखेल्लेखादनुसंतर्जनप्रोद्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः अ
न्योन्यगतयोः श्रमान्मिलितयोः सभाषणेजीवनतोर्दंपत्योरिह कोनकोनतमसि श्रीडाविमिश्रोरसः ॥७॥

भावनमितितं क्रममाह आश्लेषादिति। पुनः कीदृशयोरा श्लेषादालिंगनादनुपश्चान्नखेल्लेखनादनुन
खक्षतात्पश्चात्तर्जनप्रोद्बोधः कामवर्धनं पश्चात्संभ्रमात्। अनुवेगात्पश्चात्तारंभात्अनुसु
रतोद्योगात्पश्चात्प्रीतयोस्तृप्तयोः पुनः कीदृशयोः सभाषणेरालापेजीवनतोः ममार्थमिति ॥७॥

मिलित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

६ पुनः श्री-श्री प्रतिनवरस्तेरस्तः मुहुः पुनः पुनः स्थितापदानिचरणभाषारानूनिनवतीरसे
कुलुभात्यस्यचरणयातनभयादिति भावः पुनः श्री-श्रीकथमपिअंधकारस्यनिविडतानि
नापिप्रमाणरहः प्राप्ता॥६

श्री-गी-टी-
॥८७॥

लुभात कृष्णः कृतार्थोभवतीत्याह सभयेति हेसुमुखिसुनदेराधे सुभगः सौभाग्यवान्कृष्णः
तांपश्यन्कृतार्थतांसमुपैतुप्राप्नोतु कीदृशीं तांतिमिरेअंधकारसहितेपथिमार्गे सभयचकितम

स

सभयचकितंविन्यस्यंतींदृशोतिमिरेपथिप्रतितरुमुहुःस्थित्वासंदेपदानिविनिचर्तीं॥
कंथमपिरहःप्राप्तामंगैरंगंतरंगिभिःसुमुखिसुभगःपश्यन्सलभुपैतुकृतार्थतां॥८॥

गी

यविस्मयसहितंयथास्यात्तथादृशंदृष्टिंविन्यस्यंसिपतींनिबिडांधकारदर्शनात्भयंअंधकारेदृष्टिसंगं
गमनात्दृष्टिसंयंपुनःअनंगतरंगिभिःकामस्यतरंगःपुनःपुनःउद्वेगोतयुक्तैःकामादिभिरुपलक्षितं
स्वाधीन
अतएवपुनःतरुंप्रतिस्थितासंदेयथास्यात्तथाशीघ्रपदानिअनेकंयंती [illegible] एवंदुरुव्रतःप्राप्तनिया
रहःसंकेताभिसारस्थानंप्राप्तामितिविचिनुवतीमितिपाठे [illegible] एकाकीकथमपिनिति

॥८७॥

चरं

दृशा-गीकविभक्तजनान्प्रत्यानिभंअंतेराधेतिराधेतिरेवकीर्तनंकृष्णःतांभक्तजनेंअवतुदुरितादक्षतु
कीदृशःराधापाःमुग्धसुंदरंसुखारविंदसुखकमलंतस्यमधुपोभ्रमरइवनीलतात्सुखपालकः
वाचाएकःत्रैलोक्यस्यउत्कंसस्यामोलिरुलतीमुकुटरुचानतेस्वेनपथ्यावितिअलंकारयोगमुनीलो
राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिरुलतीनेपथ्यावितनीलरत्नमनुनीभारावतारात
कंसध्वंसकृदंजसुंदरीजनमनस्तोषप्रदोमाधवःश्रीकंसध्वंसनधूसकंतुरिवतुलादेवकीनंदनः॥
इतिश्रीगीतगोविंदेमहाकाव्येजयदेवकृतेसाकांक्षपुंडरीकोनामपंचमःसर्गः॥५॥

रत्नमिवरुंद्रनीलमिवस्थितःपुनःकीदृशःअवनीभारावतारेभूभारावतरणेक्षमःसमर्थःपुनःकीदृशः
स्वछंदःनीःस्वाधीनोव्रजसुंदरीजनानांगोपिकानांमनस्तोषंचित्तंतोषंप्रदोसारोनिमुखलिंगारा
मुखेहिनायकस्यप्रियोपुनःकीदृशःकंसस्यमालुलस्यध्वंसनंमारणंधूसकेतुरिवस्थितःराधायागलसाक

प्रीतो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीगो॰श्री॥४७॥

अथेति अथानंतरं सखीगो॰ विदेकस्त्वविषयेकस्त्वांतिकमागत्येत्यर्थः। तत्र रितंराधाचरितंप्राह॥ अकृतपति
कृतागृहे तारा धागंतुमुत्रा क्ता दृष्टा। चिरमनुरक्तं अनुरागिणी। कीटशी गोविंदे मनसिजमंदे क
मनविद्धः॥ पत्र्यतीति अस्यगुणः करीरागीतलूसणं। पितं सुकांतं तत्रतिप्रतीक्षामालापयंतीष्ट

अथ तांगवुमुत्रा क्तां चिरमनुरक्तं लतागृहे दृष्टा॥ तत्रितं गोविंदे मनसिजमंदे सखीप्राह॥ गुणकरीरा
गिणकसकतालेगीयते पत्र्यतीति तत्रितिरहसिभवं तत्रदधरमधुरमधूनि पिबंतं॥ नाथ हरनाथह
रेसीदतिराधावासगृहे॥ ध्रु॥

दुष्यतत्पेक्षतत्तत्प्रेरितदृष्टिराधीयमाणगुणेगणिकरीप्रदिष्टा॥ अस्मिन्गीतेवासकसज्जा वध्यतावास
नेसमनिसुकल्पितत्तल्पेयासमागमतिर्धिविदधाना पत्र्यतिप्रियसमागमनंयाता मिहकलयासकसज्जा॥ भा
व्यहरनाथहरेमिदुरुक्तं राधातवगुणहसगसरुक्ता॥ तत्र हेतुः सीदतिअलसं नामवता कथमिलसतआह
सारा धारहस्तांतस्तितासतीदिशिहितिभवतलोपत्र्यतिकीटशी अधरवरदंनायिकाधरामृतवत्मधुराणि

तत्रोद्दावपि॥ अन्यपथीयेत्यो॰ ॥ ॥ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

रतोहृद्कांतपथ ३

गीगो॰टी॰ ॥४२॥

अथ्येति॰अथानंतरंसखीगो॰विदेकृष्णविषयेकृष्णांतिकमागत्येत्यर्थः॥ तत्रहितंराधाचरितंप्राह॥ अकस्मात्ती
तिकिकृत्वागृहेतांराधांगंतुमशक्तांदृष्ट्वा॥ विरमनुरक्तांअनुरागिणी॥ कीटरागीविदेमनसिजमदेन
मनविद्धः॥ पश्यतीतिअस्यगुणःकरीराशीलतूलक्षणोपितेलुकांतेतरतिप्रतीक्षामालाप्यतीतृ

अथुतांगंतुमशक्तांविरमनुरक्तांलतांगृहेदृष्ट्वा॥ तत्रहितंगोविदेमनसिजमदेसखीप्राह॥ गुणकरीरा
गिणरूसकतालेगीयेतेपश्यतीदशिदिविरहसिभवंतांतदधरमधुरमधूनिपिबंतांनाथहरेनाथह
रसीदतिराधाधावसगृहेतृ॥

दुपुष्पतल्पेप्रेतलतःप्रेरितदृष्टिराशाकुयामात्तुगैणकरीप्रदिष्टा॥ अस्मिन्गीतेवासकसज्जावर्ण्यतेभास
वसनिसुकल्पितताल्पेयसमागमविधिविरधाना॥ पश्यतिप्रियस्यमार्गमनंयाताभिहाकलयासकसज्जा॥ ना
थहरेनाथहरेइतिदिवसंतंराधातवसगृहवासरक्तानां॥ तताःहेताःसीदतिअवसन्नाभवंतीकथमित्यतआह
सारापोरहस्यकांतेस्तिताससीदतिदिवादिवाभवंतांपश्यति॥ कीटरागीअधरवदनायिकाधरामृतवत्मधुराणि

तनखोद्वापि॥ अन्यपर्यायोवा॥ प्रोक्तेतास्यास्पाःनामिकाभार्यापरः॥ ॥

मधुरिपिवांतां॥ ॥४२॥

उत्तर

नि नि ३

वादमिसाराधाकिंयंतिदिशीणिपदानिचलंतीगच्छंतीपतति॥ अधिकंगंतुंनपारयतीत्यर्थः॥ कीटरागीलदमिस
रणरभसेनचलंतीलदमिसारोत्सहेनसज्जमाना॥ विहितेतिहेकृष्णसाराधातवरतिकलयासुरतलक्ष्मीं
तेनरहसमेपरकेचलंजीवतिहेनहेतुरन्योनास्तीत्यर्थः॥ कीटरागीविहितांकृतांविशदांसुभ्रांविस

वदमिसरणरभसेनचलंतीमततिपदानिकियंतिचलंती॥२॥
विहतविशदविसकिसलयवलयाजीवतिपरमिहतवरतिकलयया॥३॥
मुहुरवलोकितमंडनलीलामधुरिमुरहमितिभावनशीला॥४॥

किसलयाएवमृणालंकुराएववलयानिकंकणानियस्याः॥ मुहुरिति॥ पूर्वंलोकेनाल्पयः॥ मुहुःपुनःअव
लोकितादृष्टितानंडनलीलाअलंकारविलासोययासातांनामिनाशिरवर्कंमंडनमिति॥ पुनःकीटरागीअहंमधु
रिमुरिति॥ कृष्णइतिभावनंध्यानमेवशीलंस्वभावःसहृतायस्याः॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीबंधो॰टी॰
॥४२॥

त्वरितमिति। सा सखी मिति वारं वारं पुनः पुनः वदति। इति तिर्कि। हरिः कृष्णः त्वरितं शीघ्रं अभिसारं अभिसारुमनं कथं नोपैति। आश्लिष्यतीति सा राधा हरिः कृष्णः उपैतः प्राप्त इति। अलं पर्याप्तं बहु तिमिरं अंधकारं श्लिष्यतिचुंबति। कीदृशीति निरंजलधरकल्पमेघसदृशमित्यर्थः। स्निग्धत्वा नीलत्वाच्च कृष्णसाम्यं तिमिर

त्वरितमुपैति न कथमभिसारं। हरिरिति वदति सखीमनुवारं॥ आश्लिष्यति चुंबति जलधरकल्पं॥
हरिरुपगत इति तिमिरमनल्पं॥ भवति विलंबिनि विगलितलज्जा॥ विलपति रोदिति वासकसज्जा॥ श्रीजयदेवकवेरिदमुदितं॥ रसिकजनं तनुतामतिमुदितं॥ ८॥ ॥४२॥

स्यात्। भवतीति। तयि विलंबिनि विलंबं कुर्वति विगलितलज्जा सा राधा विलापं करोति रोदिति। कीदृशी वासकसज्जा विहितसंधानेत्यर्थः॥ श्रीजयदेवेति। जयदेवकवेः इदं मितं रसं गीतं रसिकजनं भक्तजनं अ

लक्ष्मीधरकवेर॰

वि

तिरं॥ ॥४२॥

विपुलपुलकपालिः शीत्कारं पंक्तिः यस्यां सा ध्यानकल्पितस्वतरकरस्थेत्यर्थः
नरगंतवतीत्यर्थः पुनः कीदृ॰

विपुलेति। हे धूर्तवंचकसाम्भृगाक्षीहरिणनयना। तवरसजलधिनिमग्ना। शृंगारसागरे निमग्नालीना बभूवुरतिअधाहरः। किंकलाभनंगकंदर्पचिंता महतः कामस्य चिंतनं स्मरणं विधाय कृत्वा। ध्यानेनतवेवचिंतनलग्ना। तत्परा पुनः कीदृशी। तद्दृष्टा सा तादृक परिकल्प्य स्फीतसीत्कारं यथा स्यात्तथा अंतः अभ्यंतरे जनि

विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती। तवकितवविधायामदकंदर्पचिंतारसजलधिनिमग्नाध्यानलग्नामृगाक्षी॥

तः उत्पादितः। जडिमाजडत्वं यस्यां क्रियायां यथा भवति तथा। काकुनाध्वनिविकारविशेषेणव्याकुलं यथा स्यात्तथा व्याहरंती। तवकरंनी बीबंधो श्रीचनासक्तं परिकल्प्य निषेधवाक्यं वदतीत्यर्थः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अंगेषिति॥एषावरतनुःसुंदरांगीत्येतिबुधाराधांप्रत्यसीकृत्यवदतिराधाअंगेबहुस्तादिषुआभू
रणमलंकारंबहुराःकरोतिएतेनआकल्पउक्तःपत्रेपर्णसंचारिणिचलितेतातिलेप्राप्तआगत
परिशंकोतर्कयतिएतेनविकल्पउक्तःलोमागतलोदाराश्यांरायनीयेवितनुतेकुरुतोरत

अंगेष्वाभरणंकरोतिबहुराःपत्रेपिसंचारिणिप्राप्तंलांपरिशंकतेविनयुतेशय्यांविरंभा
यतिरत्नकेल्पविकल्पेकल्पःस्वनासंकल्पलीलारातआसक्तोपिविनालयावरतनुर्नैषानि
रालेष्यतिसू
न्यस्वनाउक्तःचिरंआयतिर्वितयतिकृष्णसंगमेमयारदमिदंकर्तव्यमिपिअनेनसंकल्पलो
लायतकृष्णमिति मूर्खकप्रकरणोऽकल्पोभूषणं विकल्पःतर्कःतल्पस्वनाशय्यास्वनासंक
ल्पं लीलारातं रतबहुचिंतनेनविलासरातःएषुआसक्तोपिलयाविनानिशारात्रिनेष्यतिनगमिष्य
ते

सर्गातिमंगलमाहार्कविश्राम्यसीतिकंत्वियधिकंप्रतिराधायाश्चनांहेपथिकंभांडीरभूमीतरुहिभांडीरा
नामवटवृक्षसमीपेकिंविश्राम्यसि किमित्या[illegible] विश्रामाभावेहेतुगर्भविशेषणमाहार्क
टवोवृक्षेकृष्णभोगिभवनेश्यामसर्पकृष्णोततःश्रीकृष्णस्य भागवतःस्तानमितिराधाश्चनोभि
श्रापंप्राप्तालासायकालातिथिनिवारणजनितदोषाभियातप्रत्याहाहेभ्रातःबंधोसानटःनंदस्यदकथ
किंविश्राम्यसिकृष्णभोगिभवनेभांडीरभूमीतरुहिभ्रातर्थीसिनटस्त्वंगोचरमितःसानंदनंदास्यदशराध
याश्चनंतद्धेतुखाःनंदसिकेस्मिंतुगोविंदस्यजयतिसायंमतिथिःसुलिंधगणोगिरांमायादिवास
नन्यसिनगतःकिंकीदृशोरतःस्तानातदृष्टिगोचरःवस्तुविवेचयातस्यानंदमनःनाल्पोदेव
रहाभिप्रायरतःकिंचिनंदग्रामस्थःअधंगतुवृतरोधायालाहस्तांसुलानंदतिहर्मप्राप्तुर्वतिमुद्धःपुनःगोविंदस्य
लोकस्यगिरोवाण्यःजयतिसर्वकर्मवर्तनोःशुद्धःहेतुगर्भविशेषणमाहकोकटकगिरिःसायंकालीनस्यातिथिःसुलि
ध्रुगभांअभिष्यादरगर्भआगायायातोताःअयंवातएवग्रामस्थःगोविंदस्यगिरोवाणीःपुनःजयतिआनंदगो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधुना चंद्रोदयेराधायाः विरहं यथाधिकं वर्णयन्नाह। अत्रांतरेति। अस्मिन्नवसरे इंदुश्चंद्रोऽंशुजालैः किरणसमूहैः इंदावनांतरं इंदावनमध्यप्रदेशं अ दीपयत् प्रकाशितवान्। कीदृशः इंदुः स्फुटलांछनश्रीः फलंकश्रीः। भाव्यस्य कीदृशः कुलटाकुलवर्त्मपातसंजातपातकइव स्फुटलांछनश्रीः फलंकश्रीः। अभिसारिकाणां कुलस्य समूहस्य वर्त्मपातेन मार्गप्रतिरोधेन संजातपातकइव

अत्रांतरे चकुलटाकुलवर्त्मपातसंजातपातकइव स्फुटलांछनश्रीः।
इंदावनांतरमदीपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः॥२॥

तत्र पातकइव पातकिनः कलंकोऽस्य कोऽभवति। पुनः कीदृश्यः दिशः इव सुंदर्यः नायिकाः तासां वदनचंदनबिंदुमुखे श्रीखंडतिलकइव स्त्रीतिलको वर्तुलो भवति। असतीनां चंद्रोदये गमनाभावात् वर्त्मपातः॥२॥

॥४५॥

असरतीति। साराधाविरहितकृतानाम्यप्रकारो विलापोऽयस्मिन्। तत्र त्रैः महांतं परितापं दुःखं चकारकस्मिन्सति। राधारबिंबचंद्रमंडलेऽद्य च तिष्ठति। असरतीति माधवे कृष्णे विहितविलंबे कृति। विधुरा विह्वला। शाकं चितति। अस्य गीतस्य गौडमालवरागः। रागलक्षणं प्राग्उक्तं। विलंबमिलनं गीतेन। अत्र विप्रलंभे

असरतीति राधारबिंबे विहितविलंबे च माधवे विधुरः॥ विरहितविधविह्वलं
सापरितापं चकारो त्रैः [illegible] गौडमालवरागेणप्रतिमंडतालं
गीयते॥

अथानयिकावर्णनं। तल्लक्षणं भरतौ। त्रिविसेलदनुरागादूतिकांक्षेण्यर्ससरलसमपिचापिकापिसंकेतभूमौ। नमिलतिसलुयस्याबल्लभो दैवयोगात्तदवदति भरतस्तानपिकां विप्रलब्धां॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मम्मिर किंनुकुलमेवशरणंथामि २

विलापमेवाहगीतेन।कथितोतिहेहरिस्वचित्तसंबोधनं।हहनिर्जनेसखीजनस्यवचनैःकृष्णागमनमेव
हेकेःवंचिताप्रतारितोहंकंपुरुषंशरणंरक्षितारंजामिजलप्रवेशे।"त्वयः॥८॥किमित्यतआह
अहहेत्याश्चर्येहरिःकृष्णःकथितसमयेपि।उक्तकालेपिवनंवृंदावनंसंकेतस्थानंनययौनाजगा
कथितसमयेपिहरिरहंनययौवनं॥ममविफलमेतद्दुरुसमप्रियौवनं॥याभिहकमिहशरणं
सखीजनवचनवंचिता॥८॥यद्दुरुगमनायनिधिगहनमपिशीलितं॥तेनमदृदयमिदम
सखारकीलितं॥
नाकृष्णापभोगाभावात्ममेतद्दुरुसंयोग्यमपियौवनं विफलंनिरर्थकं॥॥
यदितिमृषायद्दुरुगमनायसुरतेनसंतोषयितुंनिधिरानौ॥गहनमपिनिर्जनंवनम
पिशीलितं॥तेनकृष्णेनहेतुना॥ममहृदयंचेतः॥अस्मशरणंकामबाणेनाकीलितंविद्ध
सेवितं

ममेति।हहवनेअचेतनाज्ञानशून्याविरहानलंवियोगाग्निंकिमितिविषहामितस्मान्मरणमेववरं
श्रेष्ठंमरणेविरहानलाभावात्।कीदृश्यहांअतिवितथंअतिव्यर्थंकतनेशरीरंयस्याःसा॥कृष्णनसोद

ममममरणमेववरमितिवितथेकतनु॥किमिहविषहामिविरहानलमचेतना॥८॥
मामहहविधुरयतिमधुरमधुयामिनी॥कापिहरिमनुभवतिकृतसुकृतकामिनी॥४॥

यौवनभोगाभावात्॥८॥मामितिअहहेतिदुःखाकारेमधुरमधुयामिनीमनोहरवसंतरात्रिःमांविधुरय
तिविकलयतिकापिकृतसुकृतकामिनीविहितपुण्यकांताहरिकृष्णंअनुभवतिउपभुंक्ते॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहहेति॥अहं वलयादिमणिभूषणं कंकणप्रभृतिमणियुक्तालंकारं हरिविरहदहनवहनेन
कृष्णविरहवह्निधारणेन हेतुना बहुदूषणं अतिशयापचारकलयामि मन्ये प्रियदर्शनेन्ती
णामलंकारसाफल्यमित्यर्थः॥ कुसुमेति॥ स्रगपि पुष्पमाला पि अतनुशरलीलयाकामबा

अहहकलयामि वलयादिमणिभूषणं हरिविरहदहनवहनेन बहुदूषणं॥५॥
कुसुमसुकुमारतनुमतनुशरलीलया स्रगपि हि हंतिमामतिविषमशीलया॥६॥

णविलासेन माह हिहंति॥ कीदृशीमां कुसुमवत्सुकुमारा कोमलतनुः शरीरं यस्याः सा कीदृश्या
अतनुशरलीलया अतिविषमं अतिदारुणं शीलं स्वभावो यस्याः सा बाणेन हि हंति क्षतक्रियतेन तु

पुष्पादिना॥६॥ ॥४७॥

२ अवनप्र असमरशाश्वाम्भ्य। तत्रपरि-

नि

अहमिति॥ गणितानि तिवनं कृष्णमेव यं सा प्रतिसंस्मृता वृन्दावनसामया सा अहमिह कुञ्जे किंनु वस
मि अपि निवसामि एवं विधामपि मां मधुसूदनः कृष्णः चेत सापि न स्मरति आश्चर्यं नित्यर्थः॥५॥
हरिचरणेति॥ हरिचरणौ शरणं यस्य स जयदेवकविः तस्य भारती गीतरूपा सरस्वती भक्तानां

अहमिह निवसामि न गणितवनवेतसा स्मरति मधुसूदनो मामपि न चेतसा॥७॥
हरिचरणशरणजयदेवकविभारती वसतु हृदि युवतिरिव कोमलकलावती॥८॥

हृदि मानसे वसतु। कीदृशी भारती। कोमलकला अनिष्ठुरवर्णैः कलाभिः युता च केव युवतिरिव। यथा नाप
कहृदये कोमलकलावती सुकुमारां गीं चतुःषष्टिकामकलायुक्ता॥८॥ १२॥

कलावतीकवित्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णस्यविलंबेकारणमाह। तत्किमिति।क्रांतः श्रीकृष्णेअभिसरणस्थानसंपादिते।मंजुमीनोहेसु
जुलतांकुलोकसलतांगृहांतस्मिन्नागतोनायातः।तस्मात्कामपिकामिनीं नायिकांअभिसृतां अनु
गतः।किंवाअथवाबंधुभिर्मित्रैः कलाकेलिभिर्हास्यादिक्रीडाभिः बद्धो यंत्रितः उतअथवाअंधकारिणि
तत्किंकामपिकामिनीमभिसृतः किंवाकलाकेलिभिर्बद्धेबंधुभिरंधकारिणिवनोपांतेकिमु द्भ्रम्यति।
कांतः कृष्णतमनामनागपिपथिप्रस्थितमेवाश्रमः संकेतीकृतमंजुमंजुलतांकुंजेपियं नागतः॥१॥
तमेवशुक्लेवनोपांतेवनसमीपेभ्रम्यति किंतमसिमार्गेभ्रमादश्रमंभणंत्युक्तएवाभ्यस्ते भ्रमाभावकृतितत्र
हाकृष्णतमनाः त्रिमित्तं समाकुलीकृतः करणः सन्पथिमनागपिअन्यमपिप्रस्थितमागतुमशक्तः किंतु
मर्थेअपिपाठः किं मर्थेउतकादंबनायिकाउताभवतिसाअस्याःसंकेतीनागतःप्रियःतत्स्थानागमन
किं॰

अथेतिअथानंतरंदूत्यंराधामाधवंविनोअंतरेणआगतांसखीमीक्ष्यदृष्ट्वाएवद्वीतेनवक्ष्यमाणमाह।मी
क्ष्यसखीविषादंनकार्षीत्विधामूकवक्त्रमक्षमा।कीदृशीराधा।नानार्थनृत्यकलाकथाकामिन्यारामि
तकीर्तिविरचितमानातकंनीतदृष्टवत्क्रामिन्यास्तितिकृष्णंदृष्ट्वेत्यर्थः।यथादृष्ट्वाअभिधीयतत
आग्राहेत्यर्थेएणाउन्मादेइत्यर्थः।स्मरतिअस्यगीतस्यवसंतरागःगदइतिदीयदुक्तंतत्रगीतनाटके
अथागतमाधवमंतरेणसखीमियंवीक्ष्यविषादमूकाकीदृशंकामानारमितकथापिजनानर्तदृष्टव
देवमाहाथवसंतरागेणएकतालीताल।स्मरसमरोचितविरचितवागलितकुसुमदरविलुलित
केशा॥कापिचपलामधुरिपुणा॥विलसतिवृषतिरधिकगुणा॥१॥
सखिकापिचपलाधुवतीःकामिनीमधुरिपुणाकृष्णेनसहविलसति।क्रीडतिकीदृशीसा।अधिकगुणा
मनोतिशयितसौंदर्यादिगुणयुक्ता।पुनःकीदृशी॥ स्मरसमरोचित
मधुदृष्टयाग्रविरचितःकृतःवेषोअलंकारोयस्यासाएवंकीदृशीगलितकुसुमेनपतितपुष्पस्रगाहिनादरा
दि॰

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हरिरिति। पुनः कीदृशी हरिपरिरंभणनकृच्छालिंगनेन ललितः कृतः विकारः कामोद्रेको यया सा। पुनः कीदृशी कुचकलशोपरि तरलितः चंचलः हारो युक्ताहारो यस्यां सा॥ विचलदिति। पुनः कीदृशी विचलद्भिः कंपमानैः अलकैः चूर्णकुंतलैः ललितः सुंदरः आननचंद्रो यस्याः सा। पुनः कीदृशी तद्धरपा

हरिपरिरंभणगलितविकारा॥ कुचकलशोपरितरलितहारा॥ विचलदलकललिताननचंद्रा
तद्धरपानरभसकृततंद्रा॥ चंचलकुंडलललितकपोला॥ मुखरितरसनजघनगतिलोला॥४॥

नरभसेन कलसोत्सवपानहर्षेण। कृतातंद्रा रतिसुखानुभवनिद्रा यया॥ चंचले। पुनः कीदृशी मुखरितरशा इस्तिताररसनाका यस्मिन्नुजघनतद्गत्याचाचल्यनलोला चंचला। पुनः कीदृशी चंचलाभ्यां कुंडलाभ्यां ललितौ संघृष्टैकपोलौ यस्याः सा॥४॥

दयितेति। दयितविलोकनेन कृच्छ्रमुखवीक्षणेन लज्जितां संजातलज्जां सलज्जामित्यर्थः। हसितं यस्याः सा। पुनः कीदृशी। बहुपर्कहसारसानामिवनानाप्रकारकूजितं यत्रताहशी रतिरसः क्रीडारसः तेन रसिता हृष्टा॥ विपुलेति। पुनः कीदृशी [illegible] विपुलः विपुलपुलकाः रोमांचा यस्य

दयितविलोकितलज्जितहसितां॥ बहुविधकूजितरतिरसरसितां॥५॥
विपुलपुलकपृथुवपुषमंगां॥ वसितनिमीलितविकसदलंगां॥६॥

स्याः सा पृथुर्महान्वपुः कंपो भंगस्तरंगस्तद्वयस्याः सा। पश्चात्कमेधारयः। पुनः कीदृशी। श्वसितं सुरतायासजनितं श्वासः। निमीलितं परमानंदा[illegible] मीलिताभ्यां विकसन्प्रकटीभवन्नलंगं कामो यस्याः सा। निमीलितलोचनेन रोमांचुतिकानलः स्फुरितः॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रमेति।पुनः कीदृशी॥श्रमजलकणभरेणसुरतायासघर्मबिंदुविकेनसुभगंमनोहरंशरीरंयस्याः सा॥एतेनसात्विकभावोत्पत्तिः सूचिता॥सात्विकभावः पूर्वमुक्तः॥पुनर्भस्तलाप

श्रमजलकणभरसुभगशरीरा॥परिपतितोरसिरतिरणधीरा॥७॥
श्रीजयदेवभणित मतिललितकलिकलुषहरिरमितं॥८॥ ५४॥

रपतितावक्षस्स्थलव्याप्यस्थिता॥रतिः सुरतंरणइवतत्रधीरा कुशला॥७॥श्रीजयदेवेति॥श्रीजयदेवेनभणितंउक्तंवर्णितमित्यर्थः॥हरिरमितंकृष्णभोगः कलिकलुषंकलियुगपापंशमयतु

कीदृशहरिरमितंकलिकलुषं॥५९॥

विरहेति।चंद्रविषादेनसखींब्रूते॥अयेसखि॥अयंविधुश्चंद्रः॥ममहृदयेमदनव्यथांकामपीडामतिवअत्यर्थंतनोति॥विस्तारयति॥उद्दीपकविबलात्कीदृशो॥विधुः॥विरहेणवियोगेनपाटुयन्मुखांबुजंकृष्णमुखकमलतद्वत्द्युतिः शोभायस्यसः॥पुनः कीदृशः॥वदनामपितिरयन्नौछादयन्

विरहपांडुमुरारिमुखांबुजद्युतिरयंतिरयन्नपिवदनां॥विधुरतीवतनोतिम
नोभुवःसुहृदयेहृदयेमदनव्यथां॥७॥गुर्जरीरागिणएकतालीतालः॥

राधेम
रानमपि

पुनः कीदृशः॥मनोभुवः कामस्यदूतः॥गुर्जरीरागिणएकतालीतालः॥पूर्वंगीतेनकस्याश्चिदिपरीतंअंधुनाकस्याश्चित्स्वाधीनभर्तृकायाः नायकस्तस्याः क्रीडामाहात्म्यमुद्देतीतिस्वाधीनभर्तृकलक्षणंयस्यारतिगुणाकृष्टपतिः पार्श्वमेमुंचति॥विचित्रविभ्रमासक्तास्वाधीनपतिकायजेति॥९॥

भमेरंरति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णी

गी॰ गो॰ टी॰ ॥५५॥

रागैर्लक्षणंत्रायुक्तंहेसखिअधुनाअस्मिन्कालेयमुनापुलिनेयद्वनंतस्मिन्रविजयीजयश्रीलोभा
रारिःकृष्णःरमतेक्रीडतेकथंरमतेदृश्यतेआहारमणीवदनेकातामुखेसपुलकंरोमांचसहित

रस

संमुदितमदनेरमणीवदनेचुंबनवलितांधरे॥मृगमदतिलकंलिखतिसपुलकं
मृगमिवरजनीकरेरचयतियमुनापुलिनवनेविजयीमुरारिरधुना॥१०॥

यथास्यात्तथामृगमदतिलकंकस्तूरीतिलकंलिखतिकीदृशेवदने समुदितःसमुपचितःमदनःकामोयत्रसकामेदृश्यथः।चुंबनेनवलितःसंमुखीकृतसंकोचितःअधरोयस्यतस्मिन्रजनीकरेचंद्रेमृगमिवहरिणमिव

॥५५॥

मन्दरमातलकलिखतीत्यर्थः

नये ह

घनेतिघनचयरुचिरेमेघसमूहवन्मनोहरेचिकुरेकेशपाशेकुरुबककुसुमंरक्तकुरंटकपुष्पंरचयतिपथारूढानमर्पयतिपुनःतरलितानिचलीकृतानितरुणानांमानिनीनांनयनानिअतिसुंदरेत्यर्थः।कीदृशंकुरुबककुसुमंचपलावद्विद्युद्दिवसुमुमारोभायस्यालक्ष्म्यालक्ष्यतयोक्तं

घनचयरुचिरेरचयतिचिकुरेतरलिततरुणानने।कुरुबककुसुमं
चपलासुमुमेरतिपतिमृगकानने॥११॥

हितत्वाच्चविद्युत्साम्यंपुनःकीदृशेरतिपतिःकामःसएवमृगःतस्यकानने।यथामृगवासोवनेतथाचिकुरकामृगसंघतिकामजनकेत्यर्थः।अन्यस्मिन्पिमेघेविद्युद्भवति।तरुणानामेघसमयःकामादिभावेदृश्यतिमेघोदृश्यहिहरिणानामप्यतिसुखमुत्पद्यते॥११॥

अनेक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

घटयतीतिसुघनेनिविडेकुचयुगगगनेस्तनद्वयाकाशेअमलंनिर्मलंमणिसरंमुक्ताहारंतंदेवता
रकंपटलंनक्षत्रसमूहंघटयतीति॥ [illegible] यांजयतिकुचमृगमदरुचिःकस्तूरीदीप्तिस्तयारुचिर्वि
भूषितोपुनःनखपदंनखक्षतंतदेवेंदुरीयंचंद्रःतेनभूषितंअलंकृतोगगनपक्षेशोभमानमिति

घटयतिसुघनेकुचयुगगगनेमृगमदरुचिरुपेतोमणिसरममलंतारकपटलंनखपदक्षत
विभूषितोजितविसशकलेमृदुभुजयुगलंकरतलंनलिनीदलंमरकतवलयंमधुकरनिचयं
स्मिनयनसारेष्टेदीर्घविस्तारेलोहमुद्रेरतिविश्वंजितेतिमृदुभुजयुग
लाकोमलभुजबाहुद्वयेमरकतरत्नखचितंवलयंकंकणमेवमधुकरनिचयंभ्रमरसमूहंवितरतिददाति
रत्नयतीतिलक्ष्मीकीटोभुजयुगलंजितविसशकलेकरतलमेवनलिनीदलेपद्मिनीपत्रेताद्वेभ्रमरस

जितंविसशकलंनालखंडंयेनतस्मिन्पुनःकीरशीमशीनले॥

विधिरतिवधूर्ति

रतीतिरतेःशृंगारस्यगेहंआश्रयेजघनेलितंदेमणिमयरसनेमुक्तामयींमेखलांकीटराज
घनेविपुलोमहान्तरोःपघनःशरीरस्यअतिमांसलस्त्यर्थःपुनःकीटश्चमनसिजस्यकाम
स्यकनकनिर्मितसिंहासनमिवाकीटश्चंतीरणस्यचंदनमालिकायाःहसनंनिंदकांयदराजा

रतिगृहजघनेविपुलापघनेमनसिजकनकासनोमणि
मयरसनंतोरणहसनंविधुरतिरुतवासनो॥५॥

सिंहासनेउपविष्टोतिवदान्चंदनमालिकाबध्नतीपुनःरुतवासने रुतंदंतंवाससे वस्त्रंयस्मिन्
नस्त्रीपरिमलवाचीतीत्यर्थःयदाकोमनवासनंस्थानंयत्रासनपाठ्यवासनवसनवासस्तत्र
तानेचकथ्यातइतिविश्वः॥५॥ रुतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणेति। चरणकिसलयेपादपल्लवे यावकभरणं अलक्तकपूरणं जनयति करोतीत्यर्थः। कीदृशे। चरणकिसलय हृदयोजिते। कुलेन रागातिशयात् स्वहृदयं अर्पितो स्वहृदयेन चरणकुलायावकं करोत्यर्थः। कीदृशे हृदि कमलानि लियलक्ष्म्याः आश्रये। कीदृशे चरणकिसल

चरणकिसलयेकमलानिलयेनखमणिगणपूजिते॥ बहि
रपवरणंयावकभरणंजनयतिहृदियाजितो॥

ये नखाः चमणिगणाः पुष्परागादिसमूहाः तैः पूजिते अर्चिते। कीदृशे यावकभरणं बाह्यमाच्छा
दकं बहिर्भूतं अपवरणं संवरणं यस्याः स्पष्टमित्यर्थः। नखात रमिति॥ ध॥ बहिरपवरणं-

धर। मदर्थं समवर्ण विरसदुर्जनं अप्रस

रमयतीति। हे सखि खलहलसोदरे खलस्य दुर्जनस्य हलधरस्य बलभद्रस्य सोदरे भ्रातरि लुब्धे
सुभ्रुवां अत्यर्थं कामपि नायिकायौवनरूपगुणादिभिस्तुल्यं यथा स्यात् तथा रमयति क्रीडति। इह
विटपादेरलता गृहोऽफलं निःश्रेयोजनं विरसं सरहितं यथा स्यात् तथा किं भवति। हे सखि

रमयतिसुभ्रुवांकामपिसुभ्रुवांखलहलधरसोदरे। किमफलमवसंविरमिहविरसंवदसखिविटपे।
दरोपादहरसभणनेकृतहरिगुणनेमधुरिपुपदसेवके॥ कलियुगचरितंनवसतुदुरितंकविनृपजयदेव

वदकथय हलिकस्यसोदरेरतिसौभिश्रायांखलरतिकोधाविभीषा। इति। इह कमपि कविनृपजयदेवके
कलियुगचरितंकलियुगकृतदुरितपापनवसतु नाशितु। प्रार्थनायां लोट्। कीदृशे मधुरिपुरसभणनेकस्य
शृंगारकथकेकर्तरि। पुनः कीदृशे। कृतहरिगुणने। कृतहरिगुणनं चिंतनं येनापुनः कीदृशे। मधुरिपो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अधुना

कृष्णस्यानागमनादुत्सुकितां सखीं आश्वासयंत्याह नायातइति हे सखि दूति कैतवं कुरु यदि
निर्दयो दूरारहितः राधेनं चकः कृष्णः नायातस्तर्हि किं दूयसे संतापं भवसि अनागमनकारणमाह
दुर्वल्लभः बल्लीवल्लभाः स्त्रियो यस्य सः कृष्णः स्वच्छंदस्वच्छयोतत्रस्तुलनरमतो तत्रकिं दूषणं कि पराधनत
हि सुकथमत्रोपमिष्यतीत्यतआह यदयिति हे सखि अयमेदृश्चेतोमनः प्रियसंगमाय कृष्णस्य भोगार्थ

नायातः सखि निर्दयो यदि राधस्तं दूति किं दूयसे स्वच्छंदं बहुवल्लभः सुरमतेर्कितत्रते दूषणं प्रत्या
द्यप्रियसंगमाय दयितस्याकम्यमाणं गुणैरुत्कंठार्तिभरादेवस्फुटदिदं चेतः स्वयं योस्यति ॥

यमेव यास्यतीति त्वं पृच्छसि जानीहि कीदृशं चेतः दयितस्य कृष्णस्य गुणैः शौर्यादिभिः आकम्यमाणं व
शीकृतं पुनः कीदृशं उत्कंठितं शीघ्रं कंठे आर्तिः कामपीडा तया भरः अतिशयः तस्मादिव स्फुटत्वहि
भवत्यपि वस्तुतः सकुलं गमनं तत्र सकलाकर्षा हि भवति अन्यापि गुणैः रूपैः सत्प्रियः

अपरं स्थि

या

अस्य देवांकरागः ॥ रागलक्षणं प्रागुक्तं ॥ अनिलेति हे सखि नायिकावनमालिनाल्लक्षेन रमिता क्रीडिता
साकि सलयत्रायनेन पल्लवत्राय्यथानतपति क्रीदृशेन वनमालिना अ निलेन वायुना तरलं चंचलं य
त्कुवलयं नीलोत्पलं तद्वन्नयनेयस्य तेन सर्वरसानामेवालोकनादिति भावः ॥ अस्मिन्गीतिसंचोगविया

देवांकरागेण रूपकताले ॥ अनिलतरलकुवलयनयनेन ॥ पतिनसाकि सलयरायनेन ॥
हसि यारमिता वनमालिना ॥ पृ ॥ विकसितसरसिजललितमुखेन स्फुटतिनसामनसिजविधिरेन
॥ ॥

गोवरात ॥ विकसितेति ॥ विकसितं प्रफुल्लं यत्सरसिजं कमलं तद्वन्मनोहरं ललितं मनं यस्य एकं तेन
लेन न्यारमिता सामनसिजविधिस्तेनकमवर्णेन स्फुटति नविद्भवतीति संयोगे वियोगे पुनः स्फुटत्वं
टिकाकृता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधुना

कृष्णस्यानागमनात् दुःखितां सखीं आश्वासयंत्याह नायात इति। हे सखि दूति वैटकर्मकुशले। यदि निर्दयो दयारहितः राधेर्वचकः कृष्णः नायातस्तर्हि किं दूयसे संतप्तो भवसि। अनागमने कारणमाह। बहुवल्लभः बहवो वल्लभाः स्त्रियो यस्य। सकृष्णः स्वच्छंदस्त्वं च यातं तत्र रूठानरमतो। तर्वा किं दूषणं कोपराधः। तर्हि सकथमत्रेत्याशंक्य तीत्यत आह। हे सखि अयमभेदं चेतोमनः प्रियसंगमाय कृष्णसंभोगार्थं तं

नायातः सखि निर्दयो यदि शठस्त्वं दूति किं दूयसे स्वच्छंदो बहुवल्लभः सुरमतेः किं तत्र ते दूषणं। राधा द्यप्रियसंगमाय दयितस्याकस्मिकं गुणे रूक्तार्तिभरादिदं चेतः स्फुटदिदं चेतः सयं योस्यति॥

यमेव यास्यतीति। वंपुत्रयजाशी हि कीदृशं चेतः। दयितस्य कृष्णस्य गुणैः सौंदर्यादिभिः आकृष्यमाणं वशीकृतं। पुनः कीदृशं। रूक्तं। श्रीकृष्णे आर्तिः कामपीडा तया भरो अतिशयः तस्मादिदं स्फुटत्वं हि भवत्यपि वस्तुतः सकुलस्थाने कृष्णे तं स्वकस्माद्धि भवति। अन्यापि गुणैरुक्तैः सन्नद्धयं

अपरं

स्थि

या

अस्य देशांकरागः। रागलक्षणं प्रसुकं। अलिति हे सखि नायिकावनमालिना कृष्णेन रमितां क्रीडिता साकिसलयत्रायनेन पल्लवत्रायमयानतपति। कीदृशेन वनमालिना। अलिति नवा पुनः। तरलं चंचलं च तुवलयं नीलोत्पलं तद्वन्नयनं यस्य तेन। सर्वस्यानावलोकनादिति भावः। अस्मिन्रीतिसंयोगविया

देशांकरागेण रूपकताले। अलिलतरलकुवलयनयनेन। पतिन साकिसलयत्रायनेन॥

हे सखि यारमितावनमालिना॥ १॥ विकसितसरसिजललितमुखेन। स्फुटतिन सामनसिजविधिरेवनः॥ ॥२॥

गोत्रवातयेन। विकसितेति। विकसितं प्रफुल्लं यत्सरसिजं कमलं तद्वन्मनोहरं। अनंगस्य एवं भूतेन मुखेन यारमितासामनसिजविधिरेवनकामबाणैन स्फुटतिः। नविद्धो भवतीति संयोगे वियोगे तु स्फुटत्वं

तिकाक्ष॥ ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमृतेति। अमृतवन्मधुराणिमनोज्ञानिमृदुतराणिकोमलानिवाक्यानियस्यतेनवनमालिनाया
रमितासामलयजपवनेनमलयानिलेननज्वलति। नसंदीप्यतेसंभोगे। वियोगेचसानलेनज्वलतीव
॥ स्फुरतीति स्फुरज्जलरुहाणिस्फुरत्पद्मानारुचिरिवरुचिर्यस्याताद्रशः करचरणायस्यतेनवनमालि
नायारमितासाहिमकरकिरणेन। चंद्रदीप्तानदहति। नोपतप्तामवति। अवलासिंतालक्ष्मीभावप्रतिसंयो
गे। वियोगेतुनदहति। अपितुदहत्येव। स्फुरत्पद्मस्यातिलोहितलेनोपादानं॥४॥

अमृतमधुरतरमृदुवचनेना। ज्वलतिनसामलयजपवनेना॥३॥
स्फुरज्जलरुहरुचिकरचरणेना। दहतिनसाहिमकरकिरणेना॥४॥

॥५५॥

सजलेति। सजलजलदसमुदयवत्तोयदकमेघोदयवत्तरुचिरेणसुंदरेणवनमालिना। यारमिता
साहृदिमनसिविरहभरेणविरहाधिक्येननदलतिनविदार्यतेप्रतिसंयोगे। वियोगेतुकिंनदलतिअ
पितुदलत्येवेतिकाकुभावोज्ञेयः॥५॥ कनकेति। कनकनिकषस्यसुवर्णरेखायाःरुचिरिवरुचिर्यस्यतत्

सजलजलदसमुदयरुचिरेण। दलतिनसाहृदिविरहभरेणेना॥५॥
कनकनिकषरुचिशुचिवसनेना। श्वसितिनसापरिजनहसनेना॥६॥

टीका॥ शुचिविमलंवस्त्रंयस्यापीतांबरेणेत्यर्थः। तेनवनमालिनायारमितासापरिजनहसनेनश्वसि
तिनश्वासंकरोतीतिसंयोगे। वियोगेतुअपिपुनश्वसत्येव॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याप

सकलेति सकलभुवनेयेजनाःयुवानःतेषामपिवरेणश्रेष्ठेनतरुणेनयूना।अतिकरुणेना।अतिदयावता
नमालिनायारामेतासारुजंपीडांनवहति।इतिसंयोगे।वियोगेतुसारुजंवहत्येवाकीदृशेनकरुणेन

सकलभुवनजनवरतरुणेनक्षहतिनसारुजमतिकरुणेन॥७॥
श्रीजयदेवभणितवचनेनप्रविरातुहरिरपिहृदयमनेना॥८॥

करुणा

अतिकरुणेनेत्यामतिक्रांतेनतिर्द्येनेत्यर्थः।अतिकरुणेनेत्युपलक्षितासतिइतिक्रियोगेविशेषणं
ज्ञेयं॥श्रीजयदेवइति।अनेनश्रीजयदेवभणितंयद्वचनंगीतरूपंतेनहरिरपिहृदयंभक्तानांप्रवि
शतुपुण्यदातृत्वात्॥८॥१६॥

करुणस्तुरसेवृक्षेकृपायांकरुणामृतइतिविश्वः- अतिकरुणरसेन २

टीकानीपीयं

कामभोदननक१

तेमलयानिलंप्रार्थयते।मनोभवेति।हेमनोभवानंदनचंदनानिलमलयवात।प्रसीदमभोपरिप्रस
न्नोभवारेदत्याक्षेपसंबोधनेदुःखकारितत्वात्।दक्षिणवामतांप्रतिकूलत्वंत्यजा।हेजगत्प्राणजगता
प्राणभूता।क्षणंअल्पकालं माधवपुरोग्रेविधायकृष्णपुरतःकृत्वामममप्राणहरेभविष्यसि

मनोभवानंदनचंदनानिलप्रसीदरेदक्षिणमुंचवामतां॥क्षणंजगत्प्राणविधाय
माधवंपुरोममप्राणहरोभविष्यसि॥१॥

प्राणगमनसमयेहिकृष्णदर्शनमतिदुर्लभमितिजगतांप्राणहरत्वमनुचितमितिभावःवामंस
ज्ञेप्रतीपेचद्रविणेचातिसुंदरइतिविश्वः।करुणस्तुरसेवृक्षेकृपायांकरुणामृतइतिविश्वः॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपि सखीं प्राह रिपुरिति। यस्मिन्कुलेगते दूरं स्थेसति। अयं सखीसंवासः सखीभिः सहसम्बन्धवासः। अत
स्तद्भवं रिपुरिव मम मनः दुनोति। संतापयति। हिमानिलः शीतलवायुः। वि। रवी। वह्निरिव मम मनः
दुनोति। सुधाराश्मिश्चन्द्रः विषमिव दुनोति। तस्मिन्नदय करुणारहिते प्रिय एव। अविचारि। मम हृदयं मम

रिपुरिव सखीसंवासः यं शिखीव हिमानिलो विषमिव सुधारश्मिर्मनो दुनोति मनोगते॥ मम
हृदयमद्य तस्मिन्नेव पुनर्वलते बलात्कुवलयदृशां वामः कामो निकामं निरङ्कुशः॥

नः पुनरपि बलात्हृगतं वलते संगच्छते। निवार्यमाणमपि तत्रैव गच्छतीत्यर्थः। यतः कुवलयदृशां नीलोत्प ॥५७॥
लाक्षीणां नारीणां वामः क्रूरः कामो निकामं अतिशयेन निरङ्कुशः स्वेच्छाचारी अपरं तत्र इत्यर्थः॥

बाधामिति ॥

पुनरपि जीवितं निरयेक्षलेन मलयानिलादीन्प्रत्याह। हे मलयानिल चन्दनवायो। बाधां मम पीडां विधे
हि कुरु हे पंचबाणकाम। तं प्राणान्न गृह्णाण। यथा पुनरपि अहं गृहं नात्रयिष्ये। न यास्यामि। तथा प्रा नाश्रयामि:

बाधां विधेहि मलयानिल पंचबाणप्राणान्न गृह्णाण न गृहं पुनरात्रयिष्ये॥
किं ते कृतांतभगिनि क्षमयातरंगैरंगानि सिंचमम शाम्यतु देहदाहः॥

णान्न गृह्णाणेत्यर्थः। हे कृतांतभगिनि यमुने। ते तव रंगैः तरंगैः किं। यमभगिन्यास्तव शांतिर्नोचितेति भाव क्षमय
लं तरंगैः स्वकीयैः कल्लोलैः अंगानि सिंचा। तेन मम देहदाहः शरीरसंतापः शाम्यतु मम मरणमेव मे शांतिरित्यर्थः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



सांद्रेतिसेपकः दरिदिरः मकरंदवत्पुष्परसवत्सुंदरंयथातथागलत्सामदाकिन्यावि
यङ्गंगायामेदुरस्निग्धमित्यर्थस्तत्पुनःकथंभूतं ॥४॥ अथकामबाणाश्च। संमोहनः

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदोदयादानम्रैर्मुकुटेंद्रनीलमणिभिः सं
दर्शितेंदिंदिरःस्वच्छंमकरंदं रगलन्मंदाकिनीमेदुरश्रीगोविंदपदारविंद
मस्तुभस्कदायवंदामहे॥४॥ इतिश्रीगीतगोविंदे निःकल्पनारायणनामसप्तमः॥७॥

सोभणस्वदहनोमारणस्तथाश्वत्वात्रकामस्यपंचबाणाःइकीतिताःइतिपदद्योतिकायांसप्तमः सर्गः॥७॥

अथुनाराधाप्रियंप्रातरागतंदृष्ट्वासाभ्यसूयंवचनमेवाहअथानंतरंकथमपियामिनीराधीतिनी
यनीत्वास्थितासारापाप्रियंरुक्षंसाभ्यसूयंसेर्ष्ययायथास्यात्तथाआहउक्तवतीकीदृशीस्मरशरैः
कामबाणैःजर्जरितापिविद्धापिकीदृशंप्रभातेप्रातःसमयेअनुनयवचनंअनुनयंप्रतिवोधाय

अथकथमपियामिनीनीयस्मरशरजर्जरितापिसाप्रभाते॥अनुनयवचनं
वदंतमग्रेप्रणतमपिप्रियमाहसाभ्यसूयाश्रा॥भैरवीरागेएकतालेः॥

पश्चुनंबाकांवदंतीकीदृशमपिअग्रेप्रणतमपिअत्रखंडितावर्णयति। तलुक्षणंअलंघ्यसमयंयस्याः
प्रियमन्वेयभोगवान्नाभोगलक्ष्मा कितःप्रातरागतःत्वाहिरवंडितीतिसाभ्यसूयंवचनमाहगीते
नसत्यगीतस्यभैरवीरागिणीमलुक्षणासरोरक्तस्फटिकमंडपसरोरुःशंकरमन्वेयतीतोलप्र

निद्राकषायमुकुलीकृतकाव्यनेत्रीनारीनखरव्रणविचित्रितसर्वगात्रः।यस्याःकुतोपिगृहगोपतिःप्रभातेसाखंडितामिदमपिभ
पुराणरिपुरपि स्मरणं॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रजनीति। हरिहरिरिति खेदानुकोशव्यथां हे केशव रतो याहि गच्छ। हे माधव त्वया हि रतो गच्छ। कोपादि
कोपनद्विरुक्तिः। कैतवबाष्पकचकपटबाष्पमावदाहे सरसीरुहलोचनतानायिकाभवुसरा भवुगुप्त
मातवविषादमनस्तापं हरति दूरीकरोति। कथं कैतवबादलमित्याह हे कृष्णतवनयनस्फुटप्रा[illegible]
नुरागमिव वहति धारयति। कीदृशेन नयनरजनिजलितनयरुणा अतिरञ्जितेन जागरागेण लोहितरागेण

रजनिजनितगुरुजागररागकषायितमलसनिमेषं क्षणहरतिनयनमवुरागमिवस्फुटमुदितरसा
मिनिवेशं॥ हरिहरिति याहि माधव याहि केशवमावदकैतवबाष्पमनुसरसरसीरुहलोचनयात
वहरतिविषादं॥ पुनः
कषायितं आरक्तं कृतं। पुनः कीदृशं। रात्रिजागरशेषलालसनिमेषं पक्ष्मचलनं यस्य। पुनः कीदृशं अनुरा
गेण उदितरसाभिनिवेशं। उदितः कथितः रसस्य अन्यकामिनीविषयिकशृंगाररसस्य अभिनिवेशः तत्परतया य
माधव कलस्य माधव रत्नेन नयनं चन्द्रयथा तिलकं शशनाकस्यापि कुशादास्तत्र मनुचितमिति

कज्जलेति। हे कृष्ण रागेण लोहितं दशनवसनं अधरः तनोः शरीरस्य अनुरूपं साटकं यंतनोति। विस्तारयति
कीदृशं दशनवसनं कज्जलेन मलिनं श्यामं मध्ये द्विलोचनं नेत्रं तस्य चुंबनेन विरचितं कृतं नीलिमरूपं
श्यामतारूपं यस्य। आरक्तस्य अधरस्य नेत्रं चुंबनेन श्यामता प्रतिपादनात्। तनोः रतुरूपं तनोतितनो

करो

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं। दशनवसनमरुणमवतु कृष्णतनोतितनो
रतुरूपं॥ मधुपुरुहरिति तवस्मरसंगरखरनखरक्षतरोचिः मरकतशकलकलितकलधौतलिपेरिव र
मनुरागलेखं। चुंबितमवति। मधुपुरिति। हे कृष्णतव वपुः। वारिरुहति जयलेखं सुरतविजयपत्र
रक्तलिखितपत्रं अवतु रक्षति। कीदृशं वपुः। स्मरसंगरे कामयुद्धे खरणां तीक्ष्णानां नखानां क्षतानि तेषां रोचः
शकलेषु मरकतशकले नीलमणिखंडे कलितानि निर्मितानि यानि कलधौतलिपिः स्वर्णवर्णक्रियाणां लिपिः तस्य
स्यात्तव विश्वमणनं॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गि०गो०श्री० ॥९॥

चरणेति।नवेद्मुरारेर्हृदयंमदनद्रुमस्यकाम "वृक्षस्य हृदयांतर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीवप्रकटयतीवा।कीदृशं।हृदयी चरणकमलादन्यस्त्रीपादप्रभावात्।गलतास्त्रवता।अलक्तकेनसिक्तं उक्षितं।किंसलयपरिवारं।नवतलाभिधानात्।पुनर्नवपदं।अत्यंतनवंसूक्ष्मनार्थी।परिवारः परिकरेसम्बन्धेवस

चरणकमलगलदलक्तकसिक्तमिदंतवहृदयमुरारेः।दर्शयतीवबहिर्मदनद्रुमनवकिसलयपरिवारं।अस्य पदंभवद्धरगतमभजनयतिचेतसिखेदं।कथयतिकथमधुनापिमयासहतववपुरे

तदृष्टांत

निपिचेति।विश्वः।अस्त्रेणेतिभवद्धरगतंतवाधरोत्तेवर्तमानंदशनपदंअन्यकामिनीदंतंतत्क्षतमनत्रेवसिमनसिखेदंसंतापंजनयतिकरोतीत्यर्थः।एतद्दशनपदमधुनापिदरनीमपितववपुः मयासहअभेदंकथंकथयतीतिनकथयतीत्यर्थः।नविद्यतेभेदोयस्यापूर्वंतयासहभेदोनास्तिरतिस्मित्तं रसभी

तव

वहिरिति।नूतनेति।वितर्कयामिहेकच्छतवमनोपिचित्तमपिवहिरिवमलिनतरंकलंकभूविष्यति।रतिनूतनतर्कयामिवयंकथंज्ञातमित्यतआहः।अन्यथालंअनुगतंतेसेवकजनमल्लक्षणं वंकथंवंचयसेप्रतारयसि।कीदृशजनंअसमशरः कामः तस्यजूरेणदीक्षयादूरेनउपतप्तोअनमलिनतंकलंकतंकीदृशंभवति।अनमतीति।अबलाकबलायस्त्रीणांग्रसनार्थंभवानवनवनुभ्रमति

वहिरिवमलिनतरंतवकच्छमनोपिभविष्यतिनूनं।कथमथवंचयसेजनमनुगतमसमशरजरजूनं।अनमतीतिभवानबलाकवलायवनखुकिमत्रविचित्रंअथयतिपूतनिकेवधूवध

वधस्यापवादः

अत्रस्त्रीग्रासेकिंचित्रंयतःपूतनिकेवरासीवेतेवधेनिर्दयंदयारहितंबालचरित्रेप्रथयतिहिवपूरवधनिर्दयेतिसंबोधनंवा।विश्वुनालयासारासरीवृताताअस्मिन्रलयिपूतेसतिप्रेकोमलंगीनामस्माकंग्रासतत्रकिंचित्रमितिभावः।अयोअथचसंप्रत्यंअंगलारेभयोरपीतिविश्वः।मन्यचाकधूर्व

१ ८-१२ श्लोकप्रमाणं पद्यपदेहतेभ—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰गो॰टी॥ भर

श्रीजयदेवेति। हेविबुधाः पंडिताः भक्तारस्यर्थः।८॥ ७॥ तवेदमिति। हेकितवं कतवलोकः प्रसिद्ध
स्यप्रस्यातप्रणयस्यप्रेमातिशयस्यभंगेननाशेनयः शोकः तंदधिमनःअतिजानिर्वचनीयुलज्जाज
नयति। कीदृश्याः ममा। तवेदं हृदयं वक्षस्थलं पश्यत्याः कीदृशं हृदयत्रियायाः नायिकायाः पदालक्त

आलोकः प्रकाश

विबुधा

र

श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं। शृणुत सुधामधुरं विबुधाः लयतिहृदा
यं॥८॥ तवेदं पश्यत्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणद्योतिहृदयं॥
ममायप्रस्यातप्रणयभंगेनकितवलोकः शोकादतिकिमपि लज्जाजनयति॥९॥

पृ
॥८॥

कनचरणयावकेनछुरितं। अतएवअरुणवत्सं। धारागवत्द्योतितुं शीलंयस्येति अरुणद्यो
यमिति पाठे अरुणआरक्ताआभाद्योतिर्यस्य। तादृशहृदयं इतिसमासः। उत्प्रेक्षते। बहिः प्रसरदनुरागमि
वबाह्यप्रसरदनुरागो हिअरुणोवर्ण्यते॥१०॥

गोपस्य

सोर

द्वीप

संगीतेकविः भक्तानप्रत्याशिषंब्रूते। धातरिति। अयंनंदात्मजः कृष्णोजगदानंदयअस्तु। लोकसुख
ग्रंभवतु। कीदृशः प्रीडाचंचलंलज्जयाचलमानंनयनत्रयाः नेत्रयाः अचलंअपांगकटाक्षंआधायाप
यित्वास्मरंसुखंरिंदस्यसुखंस्मरसुखंकारणमाहकस्मिन्सतिप्रातःउषसिअन्युतंक्रुद्धंनीलं

रव

आतनलिनचोलमच्युतमुरः संगीतपीतांशुकंराधायाश्चकितंविलोक्यहसतिस्वै
रंसखीमंडलेडौडीचंचलमंचलंनयनयोराधायरा धानेनेस्मरस्मरसुखंयमस्त
अगदानंदायनंदात्मजः॥१॥ इतिश्रीगीतगोविंदे॥ लक्ष्मीपतिनामाष्टमः सर्गः॥८॥

आतनोलवस्त्रंयस्य। यामवस्त्रंधरंविलोक्यदृष्ट्वा अच्युताराधायाः उरोवक्षस्थलंसंगीतपीतांशुकंपरिधा
नोलकृतपीतवस्त्रं। चकितंसविस्मयंविलोक्यसखीसमूहेस्वैरंहसतिवस्त्रपरिवर्तनमालोक्यहास
इत्यर्थः॥१०॥ इतिश्रीगीतगोविंदे महाकविनारायणपंडितकृतटीकायांलक्ष्मीपतिनामाष्टमः सर्गः॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथेति॥अथानंतरं सखीतां राधांप्राह॥उक्तवती॥कीदृशीं॥तां मन्मथेनकामेनखिन्नां दीनां॥पुनः कीदृशीं॥रतिरसे नस्थगारसेनभिन्नारहिता॥अतएवपुनः कीदृशी॥विषादेनदुःखेनसंपन्नां॥पुनः कीदृशीं॥अलुचितंप्या तेरि तंकच्छविलासोयस्य साकलहनेअतितांअवहिता॥अत्रकलहांतरितानायिकावर्ण्यते॥तल्लक्षणं॥ प्रा णेश्वरप्रणयकोपभरेणभीतियन्चाटुकारमचिरादहदधापश्चात्संतप्यतेमदनवह्निविरावसहस्रैर्वीक्ष्य

तामथमन्मथखिन्नांरतिरसभिन्नां॥विषादसंपन्नां॥अलुचितितहरिचरितांकलहांतरितामुवा चरहःसखीं॥॥युगीरम॥रूपकतालेहरिरभिसरतिवहतिमधुपवने॥किमपरमधिकसुख सखिभवनेमाधवमाकुरुमानिनिमानमय॥ध्रु॰॥

रुलंतुकलहांतरितेतिसास्यात्॥श्लो॰कोकंगीतनगहरिरिति॥अयेहमानिनि॥आभिमानवतीराधेमाधव वहरुलमानंअभिमानमाकुरु॥माकार्षीः॥इतिआर्यनाम्नोलोदृमेधुपवनेवसतवायोवहतिसति॥स्वयमेवलतीर यसंकेतभूमिमागच्छति॥हेसखिभवनेगृहेपिअपरमधिकसुखंअतिशयसुखंकिंनकिमपि॥नायकस्यस्वयमा

हरिरभिसरति

तालेति हे राधेतालफलादपिकठिन्येनस्थौल्येनवर्तुलत्वेनचयुरंअधिकंकुचकलशांतनघटंकिं मितिविफलीकुरुथाःकच्छहस्तव्यापारपरिशीलनाभावात्॥कीदृशीं॥अतिसरसं अतिरसयुक्तं॥तस्मि न्हृदरसाविर्भावात्॥हृदयाल्हादकमितियावत्॥॥भिन्नमन्यथावचनेसंगतदारिस्फुटं इतिवि

तालफलादपिगुरुमतिसरसं॥किंविफलीकुरुषेकुचकलशं॥॥॥
कठिनकथितमिदमनुपदमचिरं॥मापरिहरहरिमतिशयरुचिरं॥॥॥

स्वयंहारपरंअनुपदंस्थानेस्थानेअचिरंसांप्रतंकतिवारान्नकथितंयुदितंकिंतुकथितमेवकिंतदित्या ह॥अतिशयरुचिरंअतिकमनीयंहरिंकच्छमापरिहरमावज्ञासीरितिभावः॥॥

तं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰गो॰टी॰ ॥२॥ उपहसति

किमिति॥ अतिविकला असावधानेंद्रियात्वं किमितिकस्मा द्विषीदसि॥ दुःखितभवसि॥ रोदिषि॥ कंदसि॥ मदुःकनिराकरणात्॥ दा॰ गीं विषादो रोदनं च अर्थ मिति॥ सकलासंपूर्णयुवतिसभातरुणीसमाजः तवत्वां विहसति॥ तनेति॥ कर्मणि षष्ठी॥ सजलेति॥ सजलनलिनीदलशीतलशयनेन

किमितिविषीदसिरोदिषिविकले॥ विहसतियुवतिसभातवसकला॥४॥
सजलनलिनीदलशीतलशयने॥ हरिमवलोकयसफलयनयने॥५॥

हरिमवलोकयसफलयनयने॥ सजलेनार्द्रेणनलिनीदलेनकमलिनीपत्रेणशीतलीकृतायाशय्यायांस्थितं हरिं कृष्णमवलोकयपश्यादरो नान्यनयनेनेत्रे सफलय॥ ॥ सकलेकुरु॥

॥६३॥

अनुनय

जनयसीति॥ हे राधे त्वं मनसि गुरुं महान्तं॥ खेदं दुःखं किमिति जनयसि॥ उत्पादयसि॥ तस्मात् ममवचनं वाक्यं आकर्णय॥ कथं भूतं वचनं॥ अनीहितः अनाकांक्षितः भेदो विरहो यस्य॥ भवत्या हितं वचनं वदामीत्यर्थः॥ अतएव शृणु॥ ॥ कीदृशं हरिं वचनमित्याह॥ हरिं॥ हरिः उपयातु आगच्छतु॥ मधुरमधुरं वा

जनयसिमनसिकिमितियुरुखेदं॥ शृणुममवचनमनीहितभेदं॥ हरिरुपयातुवदतुमधुरं॥ किमितिकरोषिहृदयमतिविधुरं॥ ॥ श्रीजयदेवभणितमतिललितं॥ सुखयतुरसिकजनंहरिचरितं॥ ॥

नय

नवचनंवदतु॥ हृदयमनः अतिविधुरं॥ अतिविह्वलं किमितिकरोषि॥ किं चित्रयसि॥ जनमित्यर्थः॥ ॥ श्री जयदेवेति॥ श्रीजयदेवभणितं उक्तं हरिचरितं॥ कर्तृ रसिकजनं सुखयतु॥ कीदृशं॥ अतिललितं॥ अति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्प्रणमदिविरीनेसतिस्त्रधासिरंदस्थिनासि।२

वस्त्रंप्रियंकोपेनत्यजंतीराधांसखीदंप्राह॥स्निग्धेति।हेविपरीतकारिणि विपर्ययविधायिनिराधेत्वंस्निग्धे मधुरादिगीतस्मिन्प्रियेयेरुल्लयत्यंसखासि।यत्रगिणीसाहुराग।तस्मिन्दहपेस्थितासिअसंतुष्टासि यत्रस्तुलंसंप्रियंविमुखतांपराङ्मुखियातासि।तत्रस्मात्कारणात्।श्रीखंडचर्चाचंदनकयापितवदिष

स्निग्धेयत्यरुयासियत्प्रणमतिस्तब्धासियद्रागिणि द्वेषस्फुरसियस्तुस्मुखेविमुखतांयातासितस्मिन् प्रियेतद्युक्तंविपरीतकारिणितवश्रीखंडचर्चाविधंशीतांशुस्तपनेहिमंहुतवहः क्रीडामुदोयातना॥९॥

शिवंशीतांसुश्चंद्रःतपनःसूर्यइतुधारःहुतवहोऽग्निरिवा।क्रीडासंतोषाःयातना॥तीव्रवेदनाइति युक्तमेवा।तवस्तीयवचनंविपरीतकारित्वात्।९॥

मुरे

॥६४॥

चलन्२

इदशीककिभक्तान्प्रत्यावियंब्रूते।अंतरितिकंसरिपोःकृष्णस्यवंशीरवोवेणुनादःवेयुष्माकंभक्तानां जत्रेयांसिअस्थुभानिन्यपोहतुखंडयतु।कीदृशोवंशीरवःकुरंगीदृशांहरिणीनयनानांअंतर्मोहनंमो नोमोहकःमोलिचूर्णनंसाधुसाधुत्वितिविरःकंपनं। मंदारविस्रसनंगुंफितपारिजातपुष्पा धःपतनंसालिकादयात्।स्तब्धाकर्षणंस्तब्धस्यानिच्छाकर्षणंदृढहर्षणंनेत्रोत्साहःएतेषुमह

अंतर्मोहनमौलिचूर्णनंस्रस्मंदारविस्रसनस्तब्धाकर्षणंदृढहर्षणंमहामंत्रःकुरंगीदृशां॥ दुर्धर्ष= इत्यादानवद्यमानदिविषदेवरिदुःखापदाःश्रेत्राःकंसरिपोःव्येपोहयतुवोवेणुश्चयांसिवंशीरवः॥९॥

तिश्रीगो०टीकुरंगीविदोनामनवमःसर्गः॥

मंत्रःसिद्धमंत्रःवंशीरवाकर्णनेनसर्वनायिकाःसकलभावापन्नाःभवंतीत्यर्थः।स्तनःकीदृशाःटा व्याकिदर्पयुक्तैःदानवैःदैत्यैःदूयमानानांपीडितानांदिविषदांदेवानांदुःखापदोविप यंयास्तासांश्रेत्रोनाशकः वंशीरवःमुखादुःखिताअपिदेवामुदंहर्तीसर्वथा मुग्धोमूढोअलसः

दुःखापदाः२

मुरु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यनीसोत्कंठः श्रीकृष्णः राधामनुनयान्नाह। अत्रेति। अत्रांतरे अस्मिन्नवसरे। हरिः हिनातेसंध्यस
